ादिशेत्। स्त्रीपुंसयोस्तथान्योन्यं भगे लिङ्गे च चुम्बनम्। स्मरणन्तु तथा गाढं शङ्खिन्या रतिमादिशेत्। केशं करेण संगृह्य सुदृढं गजवल्लभम्। भगं करेण सन्ताड्य हस्तिनीरतिमादिशेत्। कूर्मपृष्ठं गजस्कन्धं पद्मगन्धं सुगन्धि यत्। अलोमकं सुविस्तीर्णं पद्मैतद्भगमुत्तमम्। शीतलं निम्नमत्युच्चं गोजिह्वासदृशं परम्। इत्युक्तं कामशास्त्रज्ञैर्भगदोषचतुष्टयम्"। स्त्रीशुभाशुभलक्षणन्तु उपयमशब्दे १२७८पृष्ठादौ दृश्यम्

**स्त्रीगवी** स्त्री० स्त्री चासौ गौश्च षच्समा०। (गाभि) रोहिण्याम्।

**स्त्रीचित्तहारिन्** पु० स्त्रियाश्चित्तं हरति हृ-णिनि। १शोभाञ्जने त्रिका०। २स्त्रीमनोहारके त्रि०।

**स्त्रीचिह्न** न० स्त्रिया असाधारणं चिह्नम्। १योनौ जटा०। २स्त्रिया असाधारणे चिह्ने स्तनादौ ३स्त्रीलक्षणे च।

**स्त्रीचौर** पु० स्त्रिया चौर इव। कामुके त्रिका०।

**स्त्रीजित** पु० स्त्रिया जितः जि-क्त। स्त्रैवश्ये। "स्त्रीजितस्पर्शमात्रेण सर्वं पुण्यं प्रणश्यति। न भूमौ पातकी पापात् पापिनां स्त्रीजितात् परः" ब्रह्मवै० ज० ४अ०। तस्य निन्दोक्ता।

**स्त्रीधन** न० ६त०। स्त्रीस्वत्वाश्रये द्रव्यमात्रे इति मिताक्षरादयः। "अध्यग्न्यध्यावाहनिकं भर्तृदायस्तथैव च। भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतम्" नारदपरिगणिते स्त्रीस्वत्वाश्रये धने इति दायभागादयः। स्त्रीधनस्वरूपादिकं मिताक्षरामतानुसारेण वीरमि० निरूपितं यथा

"अथ स्त्रीधनविभागं वक्तुन्तत्स्वरूपं तावन्निरूप्यते तत्र मनुः "अध्यग्न्यध्यावहनिकन्दत्तञ्च प्रीतिकर्म्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिमि" षड्विधमितिन्यूनसंख्याव्यवच्छेदपरन्नाधिक्यनिरासाय। अत एव योगीश्वरेण "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम्, इत्याद्यशब्द उपात्तः। विष्णुनापि षडधिकानि स्त्रीधनान्युक्तानि। स यथाह "पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकं बन्धुदत्तं शुल्कमन्वाधेयमिति स्त्रीधनम्" इति। नारदः "अध्यग्न्यध्यावाहनिकम्भर्तृदायस्तथैव च। भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतमिति"। षड्विधत्वं मानववदेव व्याख्येयम्। स्त्रीधनशब्दश्चायं यौगिकः स्त्रीस्वामिकन्धनमिति न तु पारिभाषिकः योगसम्भवे परिभाषाया अन्याय्यत्वात्। अत एव योगीश्वरेण रिक्थक्रयादिसाधारणस्वत्वोपायसंग्रहायाद्यपदं प्रयुक्तम्। ननु च क्वचित् स्त्रीधनत्वनिषेधोऽनुपपन्न एवं सति स्यात्। न हि स्त्रीस्वामिकत्वं तत्र निषेद्धुं शक्यते बाधात्। यथाह कात्यायनः "तत्र सोपधि यद्दत्तं यच्च योगवशेन वा। पित्रा भ्रात्राऽथ वा पत्या न तत् स्त्रीधनमुच्यते इति। उपधिश्छलवादादावेवेदं मया दत्तं त्वया धार्य्यमलङ्कारादि नान्यदेति नियमस्तत्पूर्वकं दत्तं सोपधि योगवशेन दायादानां कन्यायै दत्तमिदन्तद्धनद्वयं विभाज्यमिति। शिल्पप्राप्तं सख्यादिभ्यः प्रीत्या प्राप्तन्तदपि न स्त्रीधनमित्यप्याह स एव "प्राप्तं शिल्पैस्तु यत्किञ्चित्प्रीत्या चैव यदन्यतः। भर्त्तुः स्वाम्यन्तदा तत्र शेषन्तु स्त्रीधनं स्मृतम्" इति। पारिभाषिकत्वे भ्रात्रादिदत्तत्वेन प्राप्तं स्त्रीधनं प्रतिषिध्यते। तेनैतद्भिन्नमेव पित्रादिदत्तं शिल्पादिप्राप्तभिन्नं वा स्त्रीधनमिति परिभाष्यते इति चेत्। उच्यते। नात्र स्त्रीधनत्वनिषेधः। किन्तु तत्कार्य्यविभागादि निषेधः। अत एवोत्तरश्लोके तत्र भर्त्तुः स्वाम्यमित्युक्तम्। भर्त्तुस्तद्विनियोगे स्वातन्त्र्यन्न स्त्रिया इत्यर्थः। प्रथमश्लोके तु स्त्रीस्वत्वनिषेधोऽपि सम्भवति उपधियोगपदयोरुपादानात्। तादृशदाने च स्वत्वाभावस्य प्रसिद्धत्वात्। "योगाधमनविक्रीतं योगदानप्रतिग्रहम्। यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्त्तयेदिति" मनुवचनात् "भार्य्या पुत्त्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनमित्यपि वचनम्भार्य्याविषये शिल्पादिप्राप्तपरमेव एकमूलकल्पनालाघवात्। अध्यग्न्यादिस्वरूपन्निरूपितं कात्यायनेन "विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितम्। यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्। अध्यावाहनिकन्नाम स्त्रीधनन्तदुदाहृतम्। प्रीत्या दत्तं तु यत्किञ्चिच्छ्वश्र्वा वा श्वशुरेण वा। पादवन्दनिकञ्चैव प्रीतिदत्तन्तदुच्यते। विवाहात्परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया। अन्वाधेयन्तु तत्प्रोक्तं यल्लब्धं स्वकुलात्तथा। गृहोपस्कारवाह्यानां दोह्याभरणकर्म्मणाम्। मूल्यं लब्धन्तु यत्किञ्चिच्छुल्कन्तत्परिकीर्त्तितम्। ऊढया कन्यया वापि पत्युः पितृगृहेऽपि वा। भ्रातुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्"। भर्त्तुः